**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : www.gisrrj.com
OPEN ACCESS
ISSN : 2582-0095
doi : https://doi.org/10.32628/GISRRJ

# व्याकरणशास्त्रस्यमहत्त्वम्

डॉ.सुभाषचन्द्रमीणा
सहायकाचार्य:, व्याकरण,
केन्द्रीयसंस्कृतविश्वविद्यालय:, जयपुरपरिसर:

श्रीराजकुमार: गौतम:
शोधार्थी,
केन्द्रीयसंस्कृतविश्वविद्यालय:, जयपुरपरिसर:

**Article Info**

**Article History**
Accepted : 20 Sep 2024
Published : 05 Oct 2024

**Publication Issue :**
Volume 7, Issue 5
September-October-2024

**Page Number :** 42-50

**शोधसार:** (Abstract) संस्कृतवाङ्मये विद्यमानानां वैदिकलौकिकशब्दानां साधुत्वसम्पादनाय व्याकरणमिवनिरुक्तमप्यतीवमहत्वपूर्णंस्थानंभजतेइतिसार्वजनीनमेतत्। पाणिनीयव्याकरणशास्त्रप्रक्रियामाध्यमेन निष्पन्नानांसाधुशब्दानांनिर्वचनमकरोत्।वर्णोच्चारणज्ञानम् अन्तरेण न वैदुष्यं न च शास्त्रज्ञत्वंप्राप्तुं शक्यते । वर्णोच्चारणज्ञानम्, शब्दापशब्दज्ञानम्, प्रकृति-प्रत्ययज्ञानम् विविधशब्दनिर्माणप्रक्रियाज्ञानं च व्याकरणेनैवअवातुं शक्यते, अत: आबालवृद्ध व्याकरणस्य महत्त्वम् । व्याकरणाद् ऋते शुद्धशब्दज्ञानंपरिकृतशब्दप्रयोगश्च न संभाव्यते । अतएव एकस्यापि शुद्धस्य शब्दस्य ज्ञानंसुप्रयोगश्चस्वर्गलोकेकामधुकत्वेनप्रशस्यतेपतञ्जलिना-

एक: शब्द: सम्यग् ज्ञात: सुप्रयुक्त: स्वर्गेलोके च कामधुगभवति ।

भगवताभर्तृहरिणासाधुत्वज्ञानविषयासैषाव्याकरणस्मृति: (वाक्यपदीय) इतिनिर्दिशतासाधुत्वज्ञानार्थं व्याकरणस्यानिवार्यत्वम् उपदिश्यते । यजुर्वेदे 'दृष्ट्वा रुपे व्याकरोत् सत्यानृतेप्रजापति:' (यजुर्वेद 19.77) इतिमन्त्रेणसत्यासत्य-विवेचनमपिव्याकरणशब्देनसमर्थ्यते । शुद्धशब्दज्ञानार्थं शुद्धशब्दप्रयोगार्थं च व्याकरणज्ञानस्यानिवार्यतासर्वैरेवसंस्तूयते । अत: साधुच्यते-

यद्यपि बहुनाधीषे, तथापिपठपुत्र व्याकरणम् ।
स्वजन: श्वजनोमाभूत्, सकलं शकलेसकृत् शकृत् ।।[1]

**सङ्केतशब्दा (ज्ञमलूवतके)**:- पाणिनि:, व्याकरणम्, वेदाङ्गत्वम्, अक्षरसमाम्नाय:, अष्टाध्यायी, वाक्यपदीयम् ।

**प्रस्तावना-** व्याकरणंनामवेदानां रक्षकत्वाद् वेदार्थावबोधनेसहायकत्वात्, व्याकरणेप्रकृति-प्रत्ययस्य विचार:, उदात्तादिस्वरविचार:, उदात्तादिस्वरसंचारनियमा:, सन्धिनियमा:, शब्दरुप-धातुरुपादिनिर्माणनियमा:, प्रकृते: प्रत्ययस्य च स्वरुपावधारणंतदर्थनिर्धारणंचेतिविविधाविषयाविविच्यन्ते।वेदेषुप्रकृति-प्रत्यय-विचारस्य स्वरस्य च महन्महत्त्वमिति तत्र

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

व्याकरणमेवसाहाय्यम अनुतिष्ठतीति षड्ङ्गेषु व्याकरणमेवप्रधानम् । एतत् वेदस्य मुखत्वेनस्मृतम् 'मुखंव्याकरणंस्मृतम्' । भाषालोकव्यवहारंप्रवर्तयति । यदिभाषा न स्यात्, तर्हिजगदिदमन्धेतमसिमज्जेत् । यथोक्तंदण्डिना–

इदमन्धन्तमः कृत्स्नंजायतेभुवनत्रयम् ।
यदि शब्दाह्वयंज्योतिरासंसारं न दीप्यते ।।[2]

भाषायाः शुद्धये व्याकरणस्य अपेक्षाभवत्येव । न हिव्याकरणज्ञानशून्योजनः साधून् शब्दान् प्रयोक्तं शक्नोति । स्वयम् ऋक्संहितायाम् अस्य व्याकरण शास्त्रस्य प्रशंसायाम् अनेकेमन्त्राः भिन्न-भिन्नस्थानेषुउपलब्धाभवन्ति । ऋग्वेदस्यैकस्मिन् सुप्रसिद्धमन्त्रे व्याकरणंवृषभस्य रूपकत्वेनप्रतिपादितमस्ति–

चत्वरि शृङ्गाः त्रयोऽस्य पादा द्वे शीर्षेसप्तहस्तासोऽस्य ।
त्रिधाबद्धो वृषभोरोरवीतिमहोदेवोमर्त्याम् आविवेश ।।[3]

अस्य वृषभरुपीव्याकरणस्य चत्वारि शृङ्गाणि सन्ति-नाम-आख्यात्-उपसर्ग-निपात- रूपाणि । त्रिपादोऽस्य भूत-भविष्य-वर्तमानाः । सुप्तिङन्तश्च द्वे शीर्षेस्तः, सप्तविभक्तयश्च सप्तहस्ताः सन्ति । उरसिशिरसि च कण्ठे त्रिधाबद्धो वृषभोऽयमस्ति । एवंविधव्याकरणज्ञाना योऽनभिज्ञोऽस्ति, सः जानन्नपि न जानाति, पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोति ।

किञ्च योहिजनोव्याकरणशास्त्रज्ञोऽस्ति, तत्सन्निधोवाणीसुसज्जिताकामिनीइवसमागत्य सर्वतोभावेनसमर्पिताभवति–

आचार्यवररुचिः व्याकरणशास्त्रस्य महनीयतांगायन् यदातदध्ययनप्रयोजनानिपञ्च प्रतिपादयति, तदामहर्षिः पतञ्जलिः तदध्ययनप्रयोजनानि त्रयोदशब्रूते । तेनहिव्याकरशास्त्रं नितरांप्राचीनं शास्त्रमस्ति । न हिव्याकरणज्ञानशून्यः साधून् शब्दान् प्रमोक्तुमीराः । वेदस्य रक्षार्थं व्याकरणाध्ययनमत्यावश्यकम् ।

**पतञ्जलिउक्तं-**

"रक्षार्थवेदाध्ययनमध्येयंव्याकरणं, लोपागमवर्णविकारज्ञोहिपुरुषः सम्यग् वेदान् परिपालयिष्यति''

नैतावत् परोक्षंप्रेक्षावतां यत् वेदार्थप्रतिपादिकेषुसुप्रसिद्धेषु वेदाङ्गेषु प्रधानंव्याकरणमेवेति।लोकेऽपिप्रधानमङ्गं समेषांमुखमेवेतिसर्वेरपिसुबोधितम् । तस्य वेदस्याङ्गिनश्छन्दः, कल्पः ज्योतिषम्, निरुक्तं, शिक्षाः, व्याकरणमिति षड़ङ्गानि विराजन्ते । एतेषुव्याकरणंचाभिधीयते । उक्तंपाणिनीयशिक्षायाम्–

छन्दः पादौतुवेदस्य हस्तौकल्पोऽथपठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तंश्रोत्रमुच्यते ।।
शिक्षा घ्राणंतुवेदस्य मुखंव्याकरणंस्मृतम् ।
तस्मात् साङ्गमधीत्यैवब्रह्मलोकेमहीयते ।।[4]

अयम्भावः - शरीरावयवेषुप्रधानाङ्गमुखमिव वेदाङ्गेषु व्याकरणंप्रधानमङ्गम्, अर्थात् व्याकरणंवेदस्य मुखंवर्तते । वाक्यपदीयस्य ब्रह्मकाण्डेभर्तृहरिणाऽपिसूचितम् ।

यथा–

आसन्नंब्रह्मणतस्यंतपसामुत्तमंतपः ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणम् बुधाः ।।[5]

अतः उपर्युक्तंव्याकरण शास्त्र परिशीलनेनसम्भवतीतिसम्यगुपपादितम् । पदमञ्जर्यां हरदत्तस्तु–

उपासनीयं यत्नेन शास्त्रं व्याकरणंमहत् ।
प्रदीपभूतंसर्वासांविद्यानां यदवस्थितम् ।।[6]

इतिस्फुटंनिगदति । आचार्यभर्तृहरेः दृष्टौमोक्षमिच्छातांजनानांकृतेसरलः प्रशस्तश्चराजमार्गोविद्यतेव्याकरणशास्त्रम् । तथाहि–

इदमाद्यंपदस्थानंसिद्धि–सोपानपर्वणाम् ।
इयंसामोक्षमाणानामजिह्माराजपद्धतिः ।।

आनन्दवर्धनाचार्यः ध्वनिलक्षणकारिकायांसमागतस्य "ध्वनिरितिसूरिभिः कथितः'' इत्यस्य व्याख्यायांनिगदति–विद्वत् उपज्ञेयमुक्तिः न यथाकथञ्चित् प्रवृत्तेति । प्रथमेहिविद्वांसोवैयाकरणाः । व्याकरणमूलत्वात् सर्वविद्यानांते च श्रूयमाणेषुवर्णेषु ध्वनिरितिव्यवहरन्ति ।। एवमेवपदमञ्जर्यां हरदत्तः, न्यायमञ्जर्यां जयन्तमदृश्च समुद्धरतः पद्यमेकं शाब्दिकंप्रशस्तिपरं यस्य मूलंनैवास्तिविदितमस्माकम् ।

रुपान्तरेण देवास्तेविचरन्तिमहीतले ।
ये व्याकरणसंस्कारपवित्रितमुखानराः ।।[7]

बाल्ये येनप्रथमतोव्याकरणवृत्तिः प्रणीताअत एव व्याकरणे श्रद्धालुरादरभाक् च जयन्तभट्टः शाब्दि–शब्दशास्त्रयोः प्रशस्तिंकीर्तयन् मन्येनैवतृप्तिमेति । तद्यथान्यायमञ्जर्यांम् उक्तं–

आपः पवित्रं परमंपृथिव्याअदभ्यः पवित्रं परमंहिमन्त्राः ।
तेषांहिसामर्ग्यजुषांपवित्र महर्षयोव्याकरणंनिराहुः ।।[8]

पुनश्च तत्रैव भणति यद् गभीरे पङ्कमये जलाशयेतिमिमत्स्यरूपेणजनिमासाद्य नित्यमूकतयावस्थानंचेत्तद्वरं किन्तुमानवयोनितोजनिमासाद्य व्याकरणसंस्कारंविरहितंवाग्व्यवहारविधानंनैववरमिति ।
उक्तं च–

वरंहिजातास्तिमयोगभीरेजलाशये पङ्किनि नित्यमूकाः ।
न मानवाव्याकरणप्रयोगप्रबुद्धसंस्कारविहीनवाचः ।।[9]

रघुवंशमहाकाव्यस्य मङ्गलमाचरता कालिदासेन शब्दार्थौजगतः माहपितृरुपेणवर्णितौ–

वागर्थाविवसम्पृक्तौवागर्थः प्रतिपत्तये ।
जगतः पितरौवन्देपार्वतीपरमेश्वरौ ।। इति

वागर्थोसंभिन्नोतयोः प्रतिपत्तिः व्याकरणेनैवभवतीतितदर्थं सृष्टिसम्पादकयोस्तद्रूपेणैवस्तुतिः सम्यक् प्रकारेणकृता । व्याकरणं न केवलं शास्त्रोऽस्तिअपितुलोकव्यवहारेऽपिअस्य प्रसिद्धि वर्ततेउक्तं च–

एवंव्याकरणाभियोग–सुलभप्रौढौक्तिभिः पण्डितैः ।
अक्लेशेनविचित्रवैदिकपदव्युत्पत्तिरासाद्यते ।।

वेदे, वृहत् संहितायाम् निरुक्तादिभिव्याकरणविषयेविस्तृतवर्णमस्ति।व्याकरणनिघण्टु शब्दानांमूलोत्पत्ति शास्त्रमस्ति यथाउक्तं च–

अन्यैरप्युपबृंहिते दृढतरा सङ्गैर्निरुक्तादिभिः ।
वेदेस्वार्थधियंवितन्वतिकुतः प्रमाण्यभङ्गो भवेत् ।।[10]

व्याकरणस्य वैशिष्ट्यंप्रत्येकं शास्त्रे दृश्यते, विनाव्याकरणंसर्वस्मिन् शून्योऽस्तिअतः महाज्योतिर्विदाभास्कराचार्येणापिउक्तं–

योवेदवेदवदनंसदनंहिसम्यक्
ब्रह्म्याः स वेदमपिवेदकिमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्

शास्त्रान्तरेषुभवतिश्रवणेऽधिकारी ।।[11]

यदिवयंव्याकरणस्य उपयोगितापश्याम: तर्हिअनेनपद्येनस्पष्ट रुपेण ज्ञायते यत् व्याकरणमधीत्यैव शास्त्रान्तरेषुअधिकारिणोभवन्तिजना: । अत एवोक्तंकेचिदभियुक्तेन–

यद्यपि बहुनाधीषेतथापिपठपुत्र ! व्याकरणम् ।
स्वजन: श्वजनोमाभूत् सकलं शकलंसकृच्छकृत ।।

अस्यायमर्थ: –हेपुत्र यद्यपि त्वंबहुनाधीषे । तथापिअवश्यं व्याकरणंपठ, येनत्वयाउच्चार्य्यमाणे शब्दे 'स्वजन:' आत्मीयजन: इत्यस्य स्थाने 'श्वजन:' 'सकलम्' (सम्पूर्णम्) इत्यस्य स्थाने शकलं, अंशम् एवं 'सकृत्' (एकवारं) इत्यस्य स्थाने शकृत् विष्ठाइत्यर्थो न भवेदिति । अर्थात् साधुशब्दज्ञानंविना, वर्णोच्चारणज्ञानमन्तरेण च सकारशकारयोर्भेदो न ज्ञायेत । एवंसति 'सकृद् भुङ्क्ते' एकवारं भुङ्क्ते, इत्यर्थकंवाक्यं 'शकृद् भुते' मलंभुते, इत्यर्थकस्यात् । एवमेवस्वजन: (स्वकीयो जन:) श्वजन: (कुकुरवर्ग:)भविष्यति, सकलं (समग्रम्) च शकलम् (अर्धांश:) ।

तत्र भगवताभाष्यकारपतञ्जलिनापिउक्तं च–

एक: शब्द: सम्यग्ज्ञात: सुप्रयुक्त: स्वर्गेलोके च कामधुग् भवति । अत: अत्र जिज्ञासाभवति यत् किंनामव्याकरणम् ।

व्याकरणंनाम–अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीनविशेषेणसंस्कारविशेषेणआसमन्ताद्वैदिकान् लौकिकांश्च शब्दान् करोतिइतितथाभूत: पाणिन्यादिमहर्षिप्रणीतोग्रन्थसमूह:।

व्याक्रियन्तेव्युत्पाद्यन्ते शब्दाअनेनेतिव्याकरणम् । विउपसर्गकरणार्थकल्युट् प्रत्ययान्तोऽयं व्याकरणशब्द: । शब्दानुशासनमितिव्याकरणस्य अन्वर्थं नाम । अनुशिष्यन्तेअसाधुशब्देभ्यो: साधुशब्दा: बोध्यन्तेइतिअनुशासनम् । शब्दानामनुशासनं शब्दानुशासनम् । अत एव भगवताभाष्यकृताअथ शब्दानुशासनमितिव्याकरणस्य साक्षात् प्रयोजनमभिहितम् ।

रामायणम्, महाभारतम्, गोपथब्राह्मणम्, मुण्डकोपनिषदित्यादिग्रन्थेषु शब्दशास्त्रस्य कृते 'व्याकरण' शब्दस्य प्रयोगो दृश्यते । यथागोपथब्राह्मणे ओङ्कारस्य विषयेपृच्छति–'ओङ्कारं पृच्छाम:' को धातु? किंप्रातिपदिकम्? किं लिङ्गम्? किंवचनम्? काविभक्ति:? क: प्रत्यय:? क: स्वर:? कोविकार:? कोविकारी? कतिभागा? कतिवर्णा:? कत्यक्षर:? कति पद:? क: संयोग:?... इति । इत्यादि सर्वं ज्ञानंविनाव्याकरणं न कर्तुं शक्यते ।

**व्याकरणस्य विविधसम्प्रदाय:-** अस्य व्याकरणस्य प्रणेतारोऽष्ट नव वा आचार्या: बभूवु: । तथाहिआचार्यावोपदेवेनस्वोपज्ञेकथितंकल्पद्रुमग्रन्थैआष्टौव्याकरणग्रन्था: प्रदर्शिता: ।

इन्द्रश्चन्द्र: काशकृस्नापिशलिशाकटापन: ।
पाणिन्यमरजैनेन्द्रा: जयन्त्यष्टादिशाब्दिका ।।[12]

पुनश्चश्रौततव्यनिधिनामकेग्रेन्थेऽपिनवव्याकरणानिप्रदर्शितानि–

ऐन्द्रंचान्द्रंकाशकृस्त्रंकौमारं शाकटायनम् ।
सारस्वतंचापिशलं शाकलंपाणिनीयकम् ।।

तत्र नवसम्प्रदायेषु ऐन्द्रव्याकरणंविशालमासीत् । अस्य सर्वातिसायित्वविषयेसारस्वतभाष्ये प्रतिपादितम्–

समुद्रवद् व्याकरणंमहेश्वरे, तदर्धकुम्भोद्धरणंबृहस्पतौ ।
तद्भागभागाच्चगतंपुरन्दरेकुशाग्रबिन्दूत्पतितंहिपाणिनौ ।।[13]

महाभारतस्य शान्तिपर्वान्तर्गतस्य शिवसहस्रनामसंज्ञकस्य ग्रन्थस्य 'वेदात् षडङ्गान्युद्धत्य' इतिवचनेनस्पष्टंभवति यद् बृहस्पतिरिवशिवोऽपि षड्ङ्गानां प्रवचनं सञ्चकार । तथा च निरुक्तस्य 'बिल्भग्रहणामेयंग्रन्थसामाम्नासिषुर्वेदं च वेदाङ्गानि च'

इति वचने । तत्र युधिष्ठिरमीमांसकमहोदयेनप्राचीनानांपञ्चाशीतिमितानांवैयाकरणानांवर्णनंविहितम् । अर्वाचीनास्तुप्रधानतयाअष्टौवैयाकरणानांसमुल्लेखंकुर्वन्ति ।

तथाहिब्राह्म ऐशान–ऐन्द्र–प्राजापत्य–बार्हस्पत्य, त्वाष्ट–आपिशलपाणिनिइत्येतेषामष्टानांव्याकरणग्रन्थानामुल्लेखोविहितः । अथ च वाल्मीकीयेरामायणेउत्तरकाण्डेनव्यव्याकरणाना–मुल्लेखोलभ्यते । तत्र हनुमत्तंप्रतिश्रीरावणस्य वचनं यथा–

नूनंव्याकरणंकृत्स्वमनेनबहुधाश्रुतम् ।
बहुव्याहरतानेन न किञ्चिदपभाषितम् ।।[14]

पाणिनिनाऽपिस्वाष्टाध्याय्यांदशप्राचीनवैयाकरणानांनामोल्लेखः कृतः । तेआचार्याः सन्ति–

शाकटायन– "त्रिप्रभृतिषु शाकटायनस्य" **6-4-50**

शाकल्पः –लोपः शाकल्यस्य

आपिशलि– वा सुप्यापिशलेः **6-1-92**

गार्ग्यः –गर्गादिभ्यो यञ्च **4-1-105**, गालवः –आतोगार्ग्यस्य भारद्वाजः – ऋतोभारद्वाजस्य–**7-2-63**, काश्यपः – "तृषिमृषिकृषेकाश्यपस्य", सेवकः – "गिरेश्चसेनकस्य", स्फोटायनः – अवङ् स्फोआयनस्य **6-1-123** "विन्दतिश्चान्द्रदौर्गादिः" इत्यादिवचनेन"दौर्गव्याकरणम् व्याघ्रभूत्यादयस्तवेनम्"इतिकारिकाबलाद् व्याघ्रभूतेः व्याकरणश्चामीदिति । एवमपि–आशुबोध–जैनेन्द्रे–मुग्धबोध कलापादीनिबहूनिव्याकरणानिसन्ति ।

एतेषुसर्वविधेषुव्याकरणेषुमहेश्वर–प्रसादान्महर्षिपाणिनिमुनिप्रणीतंव्याकरणशास्त्रमेवश्रेष्ठंसारक्तरमितिचेति ।

**व्याकरणस्य वेदाङ्गत्वम्-**

वेदानांसाधुज्ञानार्थं षण्णां वेदाङ्गनां ज्ञानम् अनिवार्यम् एतेषुसत्स्वपीसर्वेषुव्याकरणेषुसार्वलौकिकवैदिकशब्दानांव्युत्पादकत्वात्पाणिनीयव्याकरणमेवसर्वतोभावेन-महनीयंमन्यते। षड् वेदाङ्गानि निर्दिश्यन्ते–

शिक्षाकल्पोव्याकरणं, निरुक्तंछन्दसां चयः ।
ज्योतिषामयनंचैव, वेदाङ्गानि षडेवतु ।।

अर्थात् शिक्षा, कल्पं, व्याकरणं, निरुक्तं, छन्दः तथाज्योतिषादि वेदस्याङ्गनि सन्तितेषुव्याकरणंमहत्त्वपूर्णं अङ्गं वर्तते । उक्तं च "मुखंव्याकरणंस्मृतम्" अतएवास्य ज्ञानेसर्ववेदपारायणजंपुण्यमितिस्पष्टं शब्देन्दुशेखरेनागेशेनोक्तम् । छन्दोग्योपनिषदिव्याकरणम् उपक्रम्य "वेदानांवेदः" इतिउक्तम् । अत्र पराशरोपपुराणम्–

पाणिनीयंमहाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकंग्राह्यं कृत्स्नंत्याज्यं न किञ्चन ।।[15]

अन्य च–

"काणादंपाणिनीयं च सर्वशास्त्रोपकारकम् ।"

व्याकरणस्पवेदाङ्गत्वविषये भट्टनागेशोक्तम् – एवञ्चैवमानुपूर्विकाश्रुतिरेवैषा । अत्र प्रमाणम्–

येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ।
कत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः ।।[16]

इदं शब्दविस्तरस्याधिगमकंव्याकरणंसर्वव्याकरणापेक्षयातीवसरलाप्रक्रियासौष्टवयुक्ता च इति ।

'बृहस्पतिरिन्द्राय दिव्यंवर्षसहस्रं शब्दपरापयणंप्रोवाच, नान्तंजगाम'' इति । अनेनव्याकरणेनतुउपसर्गापवादाभ्यां लक्षणेनतस्य प्रपञ्चेन च लबुनोपायेन शब्दप्रतिपत्ति: साध्यते ।

अर्धमात्रा लाघवेनपुत्रोत्सवंमन्यन्तेवैयाकरणा: ।।

इतिप्रवाद: प्रसरतिवैयाकरणनिकाये, समाद्रियन्ते च प्रायेणप्रवचनपद्धतौ शब्दसंक्षेपसरणिं शाब्दिका:।उच्यते च भगवतामहाभाष्यकारेण महाभाष्ये–[17]

कश्चिदुत्सर्ग: कर्तव्य: कश्चिदपवाद: कथंजातीयक: पुनरुत्सर्ग: कर्तव्य:**?** कथंजातीयकोऽपवाद:**?** सामान्येनोत्सर्ग: कर्तव्य:, तद्यथा–'कर्मण्यण्' । तस्य विशेषेणापवाद:, तद्यथाआतोऽनुपसर्गेकइति ।

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधंसूत्रमुच्यते ।।

इति षड्विधंसूत्रम्

तन्मूलकंकात्यायनवार्तिकम्–
उक्तानुक्तदुरुक्तानांचिन्ता यत्र प्रवर्तते ।
तंग्रन्थंवार्तिकंप्राहुर्वार्तिकज्ञाविचक्षणा: ।। इति ।[18]

भाष्यं च यथा–

सूत्रार्थो वर्ण्यते यत्र वाक्यै: सूत्रानुसारिभि: ।
स्वपदानि च वर्ण्यन्तेभाष्यं भाष्यविदोविदु: ।।

एतत् त्रिमुनिव्याकरणंप्रशस्तंराजते । पाणिनीयसूत्राणांसारवत्त्वादिकं, तदीयश्चैकोऽपिनानार्थकइति उद्घोषितं महाभाष्यकारेण–[19]

"प्रमाणभूतआचार्योदर्भपवित्रपाणि: शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेनसूत्रं प्रणयति स्म । महतीसूक्ष्मेक्षिकावर्ततेआचार्यस्य । तत्राशक्यंवर्णेनाप्यनर्थकेनभवितुंकिंपुनरियतासूत्रेण ।''

भट्टनागेशेनाऽपि–[20]

"सामर्थ्ययोगान्नहिकिञ्चिदत्र पश्यामि शास्त्रे यदनर्थकंस्यात्'' इति ।

अक्षरसमाम्नाय:–

अधुना अक्षरसमाम्नायप्रसङ्गे शब्दब्रह्मण: प्रसङ्गे च विचार्यते । यश्च शब्दशास्त्रस्य मूलभूतंतत्त्वम् । यस्मादेवपाणिनिना अक्षरसमाम्नाय: प्राप्त: । यस्यैवविस्तारोव्याकरणशास्त्रम्।

पाणिनिनामहतातपसाभगवतोमहेश्वराद् अक्षरसमाम्नाय: अधिगत: । स च चतुर्दशसूत्रात्मकम् अ इ उ ण्–ऋलृक्–हल् इत्यादिरूप: ।

अत्र ध्यातव्यं यद् यदासूर्य: चन्द्र: नक्षत्राणिपर्वतादीनिनासन् तदाऽन्तरिक्षेवर्तमानसूर्यलोकादप्युपरि एक: ध्वनिरभूत् । स ध्वनि: "ऊॅकार: प्रणव:'' एव आसीत् । अयमेव ध्वनि: प्रथम: शब्द: ।

अर्थात् क्षर: नाशवान् अक्षर: शाश्वत:–कूटस्थोनित्य: अत एव "अक्षरंपरमंब्रह्मस्वभावोऽ– ध्यात्मोच्यते'' इत्यनेनभगवता अक्षरमेवब्रह्मेतिसिद्धान्तितम् ।

अत एव–

"अनादिनिधनंब्रह्म शब्दतत्त्वं यदक्षरम् ।[21]
विवर्ततेऽर्थभावेनप्रक्रियाजगतो यत: ।।''

तथा–

"न सोऽस्तिप्रत्ययोलोके यः शब्दानुगमादृते ।

अनुविद्धमिवज्ञानं सर्वं शब्देनभासते ।।'' इति ।

वाक्यपदीयेभर्तृहरिणाप्रोक्तम् ।

अर्थाद् अक्षरः यत् शब्दतत्त्वमेवब्रह्म । येनैवपरब्रह्मणः समस्तजगतः प्रक्रियासृष्टिः जायते–विवर्तते । अत एव शब्द एव ब्रह्मतस्मादेवेयं शब्दब्रह्मात्मिकासृष्टिः स च शब्दः अक्षरः नित्यः । अन्ये च सर्वे दृश्यमानजगतः पदार्थाः अनित्याः । फलतः लोकेनैवकोऽपिप्रत्ययः कापिप्रतीतिः या शब्दंविनाभवितुमर्हति । सर्वज्ञानंतत्रैव शब्देऽनुस्यूतंतथा सर्वं वस्तु शब्देनैवभासते।

"ओमित्येकाक्षरंब्रह्मव्याहरन् मामनुस्मरन् ।

यः प्रयातित्यजन् देहं स यातिपरमांगतिम् ।।''

अर्थाद् एकाकारंब्रह्मरूपम् ऊँकारंसमुच्चरन् मामीश्वरं च स्मरन् यः आत्मादेहंत्यजति स परमांगतिंप्राप्नोति । अत एवास्य ज्ञानेसर्ववेदपारायणजंपुण्यमितिस्पष्टं शब्देन्दुशेखरेनागेशेनोक्तम् । छान्दोग्योपनिषदिव्याकरणमुपक्रम्य "वेदानांवेदः'' इत्युक्तम् । अत्र पराशरोपपुराणम्–

"पाणिनीयंमहाशास्त्रं पदसाधुत्वलक्षणम् ।

सर्वोपकारकंग्राह्यंकृत्स्नंत्याज्यं न किञ्चन् ।।''[22]

अस्य पाणिनीयव्याकरणस्यातिसारवत्तरत्वस्याधारः अष्टाध्यायीग्रन्थः । अष्टाध्यायीभारतीयशब्दविद्यायाः प्राचीनतमोग्रन्थः ।

पाणिनिनास्वप्रतिभाबलेनअष्टाध्याय्याः रचनाकृता । अष्टाध्याय्याम् अष्टअध्यायाः सन्ति।प्रत्येकस्मिन् अध्यायेचत्वारः पादाः, प्रत्येकस्मिन् अध्यायेसूत्राणां संख्या भिन्नाः अस्ति । सम्पूर्णाष्टाध्याय्यांप्रायशः (**4000**) चत्वारिसहस्राणिसूत्राणिसन्ति । अष्टाध्यायाः परिशिष्टरूपे धातुपाठः, गणपाठः, उणादिसूत्रम्, लिङ्गानुशासनम् तथा च शिक्षासूत्रमपिपाणिनिविरचितमेवमन्यते । सिद्धान्तकौमुद्यांदीक्षितेनअष्टाध्याय्याः **3978** सूत्राणिव्याख्यातानि । येषुलौकिकप्रक्रियाव्याख्यातसूत्राणां संख्या **3386** सन्ति । वैदिकप्रक्रियायां **263** तथास्वप्रक्रियायां **329** सूत्राणांव्याख्या कृता ।

अष्टाध्यायीनामकरणस्य रहस्यम्–

प्रथमंतावत् अष्टाध्यायी नामकरणप्रसङ्गे किञ्चित् प्रतिपादयामि–भगवान् पाणिनिः अष्टाध्यायीसूत्राणाम् अष्टमूर्तेः शिवस्य सृष्टिवत् निर्माणंकृतवान् । अष्टाध्यायीनामकरणेइदमेवगूढतत्त्वम् । यतोहिमहाकवेः कालिदासस्याभिज्ञानशाकुन्तलस्य मङ्गलाचरणे यस्याष्टमूर्ति– रूपकस्य शिवस्य वन्दनंविद्यते यथा–

या सृष्टिः स्रष्टुराद्यावहतिविधिहुतं या हविर्या च होत्री

ये द्वे कालंविधत्तः श्रुतिविषयगुणा या स्थिताव्याप्य विश्वम् ।[23]

तथा च – अवेहिमां किङ्करमष्टमूर्तेः कुम्भोदरंनामनिकुम्भमित्रम् ।।[24] इतिरघुवंशे च । तत्रापीदमेवरहस्यमन्तर्विराजते । अत एवायं शब्दः – शब्दशक्तिः – शब्दब्रह्म–

इदमाद्यंपदस्थानंसिद्धसोपानपर्वणाम् ।

इयंसामोक्षमाणानामजिह्माराजपद्धतिः ।।[25]

इतिवाक्यपदीयेहरिणोक्तम् । अर्थात् इदमेव शब्दब्रह्मपरब्रह्मणः प्रथमंस्थानम् । इयमेववाक्शक्तिः मुमुक्षूणांसरलामार्गपद्धतिः ।

अष्टाध्यायीनामकरणे द्वितीयरहस्यमिदं यत् शिवस्य पूजान्ते एभिरष्टभिर्मन्त्रैः पुष्पाञ्जलिरर्घ्यं च दीयते।ऊँ सर्वाय क्षितिमूर्तयेनमः । ऊँ भवाय जलमूर्तयेनमः । ऊँ रुद्रायाग्निमूर्तये नमः, ऊँ भीमायाकाशमूर्तयेनमः। ऊँ पशुपतये यजमानमूर्तयेनमः । ऊँ उग्राय वायुमूर्तयेनमः, ऊँ ईशानाय सूर्यमूर्तयेनमः, ऊँ महादेवाय नमः इतिवैदिकपद्धतौशिवस्य अष्टमूर्तित्ववत् अष्टाध्यायिनामकरणस्य रहस्यम् वर्तते ।

चतुः साहस्त्री सूत्राणांपञ्चसूत्रविवर्जिता ।
अष्टाध्यायीपाणिनीयासूत्रैर्माहेश्वरैः सह ।।[26]

अतः प्रतीयते यत् सूत्रसंख्याविषयेमतैक्यंनास्तितथापिअष्टाध्याय्याः स्वरूपे न काऽपिअव्यवस्थाआयाति । पाणिनेरष्टाध्यायीतुसार्वदैशिकंसार्वकालिकंसार्वजनीनंच विराजते ।

तत्र व्याकरणशास्त्रस्य अध्ययनमध्यापनंबहुकालपर्यन्तमष्टाध्यायीक्रमेणैवभवति स्म । अष्टाध्यायीसूत्रक्रमनुसृत्य पुराकथंव्याकरणाध्ययनंभवति स्म इत्यत्र महाभाष्यशब्दकौस्तुभ-काशिकादयः ग्रन्थाश्चप्रमाणम् । परन्तुवैक्रमाब्दस्यैकादशशताब्द्यांपाणिनीयतन्त्राध्ययनस्यापरः प्रकारः प्रादुर्बभूव । तदनुसारं यथाप्रक्रियंपाणिनीय-सूत्राणि सङ्कलय्य पठनपाठनस्य आरम्भोजातः । उत्तरोत्तरं च क्रमोऽयं विस्तरंपूर्णतां च गतः । क्रमोऽयं प्रक्रियानुसारीक्रमइत्युच्यते ।

अतः "ऊँकारःप्रणवः'' एव शब्दः, स च अंपौरुषेयो नित्यश्च। एवञ्च वेदवाक्यवत् पाणिनीयव्याकरणमपिनित्यः ब्रह्मतत्वात्मकश्चास्ति । अतः निश्चप्रचतयावक्तुं शक्यते यत् पाणिनीयअष्टाध्यायी शब्दविद्यायाः प्राचीनतमः ग्रन्थः। येनंसंस्कृतवाणीदैवीवाक् क्रमबद्धः, सुनियोजितः सुनियमिताः चास्ति । इति शम् ।।

सन्दर्भग्रन्थाः-


1. महाभाष्ये प्रथमाह्निकम्
2. रामायणे (किष्किन्धा, काण्डे 3-29)
3. ऋग्वेदे
4. पाणिनीयशिक्षायाम्, श्लोक 41, 12
5. वाक्यपदीये (ब्रह्मकाण्डे-11)
6. पदमञ्जरी-हरदत्तः
7. न्यायमञ्जरी
8. न्यायमञ्जरी
9. तत्रैव
10. व्याकरणेनिघण्टु
11. भास्कराचार्यः-11
12. वोपदेशः कल्पद्रुमग्रन्थः
13. सारस्वतभाष्यम्
14. रामायणे, किष्किन्धाकाण्डे
15. पराशरोपपुराणम्

16. परिभाषा-25 (पुरुषोत्तमदेव)
17. लघुशब्देन्दुशेखरम्
18. कात्यायनेवार्तिकम्
19. महाभाष्यकारे
20. लघुशब्देन्दुशेखरे
21. वाक्यपदीये का.1
22. पराशरोपपुराणम्
23. अभिज्ञानशाकुन्तले-1
24. रघुवंशे
25. परमलघुमञ्जूषा
26. अष्टाध्यायी